# ॥ શ્રી સૂક્તમ ॥

ॐ

હિરણ્યવર્ણાં હરિણીં સુવર્ણ રજત સ્રજામ ।
ચંદ્રાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥

તાં મ આવહ જાતવેદો લક્ષ્મીમનપ ગામિનીમ ।
યસ્યાં હિરણ્યં વિંદેયં ગામશ્વં પુરુષાનહમ ॥

અશ્વપૂર્વાં રથમધ્યાં હસ્તિનાદ પ્રબોધિનીમ ।
શ્રિયં દેવીમુપહ્વયે શ્રીર્માદેવી: જુષતામ ॥

કાં સોસ્મિતાં હિરણ્ય પ્રાકારામાર્દ્રાં જ્વલંતીં તૃપ્તાં તર્પયંતીમ ।
પદ્મે સ્થિતાં પદ્મવર્ણાં તામિહોપહ્વયે શ્રિયમ ॥

ચંદ્રાં પ્રભાસાં યશસા જ્વલંતીં શ્રિયં લોકે દેવજુષ્ટામુદારામ ।
તાં પદ્મિનીમીં શરણમહં પ્રપદ્યેઽલક્ષ્મીર્મે નશ્યતાં ત્વાં વૃણે ॥

આદિત્યવર્ણે તપસોઽધિજાતો વનસ્પતિસ્તવ વૃક્ષોઽથ બિલ્વ: ।
તસ્ય ફલાનિ તપસા નુદંતુ માયાંતરાયાશ્ચ બાહ્યા અલક્ષ્મી: ॥

ઉપૈતુ માં દેવસખ: કીર્તિશ્ચ મણિના સહ ।
પ્રાદુર્ભૂતોઽસ્મિ રાષ્ટ્રેઽસ્મિન કીર્તિમૃદ્ધિં દદાતુ મે ॥

ક્ષુત્પિપાસામલાં જ્યેષ્ઠામલક્ષ્મીં નાશયામ્યહમ ।
અભૂતિમસમૃદ્ધિં ચ સર્વાં નિર્ણુદ મે ગૃહાત ॥

ગંધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં કરીષિણીમ ।
ઈશ્વરીગં સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયમ ॥

મનસઃ કામમાકૂતિં વાચઃ સત્યમશીમહિ ॥
પશૂનાં રૂપમન્નસ્ય મયિ શ્રીઃ શ્રયતાં યશઃ ॥

કર્દમેન પ્રજાભૂતા મયિ સંભવ કર્દમ ।
શ્રિયં વાસય મે કુલે માતરં પદ્મમાલિનીમ ॥

આપઃ સૃજંતુ સ્નિગ્ધાનિ ચિક્લીત વસ મે ગૃહે ।
નિ ચ દેવીં માતરં શ્રિયં વાસય મે કુલે ।
આર્દ્રાં પુષ્કરિણીં પુષ્ટિં પિઙ્ગળાં પદ્મમાલિનીમ ।
ચંદ્રાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥

આર્દ્રાં યઃ કરિણીં યષ્ટિં સુવર્ણાં હેમમાલિનીમ ।
સૂર્યાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ।
તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ ।
યસ્યાં હિરણ્યં પ્રભૂતં ગાવો દાસ્યોઽશ્વાન , વિંદેયં પુરુષાનહમ ॥

યઃ શુચિઃ પ્રયતો ભૂત્વા જુહુયાદાજ્ય મન્વહમ ।
શ્રિયઃ પંચદશર્ચં ચ શ્રીકામઃ સતતં જપેત ।
પદ્માનને પદ્મ ઊરૂ પદ્માક્ષી પદ્મસંભવે ।
ત્વં માં ભજસ્વ પદ્માક્ષી યેન સૌખ્યં લભામ્યહમ ॥

અશ્વદાયી ગોદાયી ધનદાયી મહાધને ।
ધનં મે જુષતાં દેવિ સર્વકામાંશ્ચ દેહિ મે ॥

પુત્રપૌત્ર ધનં ધાન્યં હસ્ત્યશ્વાદિગવે રથમ ।
પ્રજાનાં ભવસિ માતા આયુષ્મંતં કરોતુ મામ ॥

ધનમગ્નિર્ધનં વાયુર્ધનં સૂર્યો ધનં વસુઃ ।
ધનમિંદ્રો બૃહસ્પતિર્વરુણં ધનમશ્નુ તે ॥

વૈનતેય સોમં પિબ સોમં પિબતુ વૃત્રહા ।
સોમં ધનસ્ય સોમિનો મહ્યં દદાતુ સોમિનિ ॥

ન ક્રોધો ન ચ માત્સર્યં ન લોભો નાશુભા મતિઃ ।
ભવંતિ કૃતપુણ્યાનાં ભકતાનાં શ્રીસૂકતં જપેત્સદા ॥

વર્ષંતુ તે વિભાવરિ દિવો અભ્રસ્ય વિદ્યુતઃ ।
રોહંતુ સર્વબીજાન્યવ બ્રહ્મ દ્વિષો જહિ ॥

પદ્મપ્રિયે પદ્મિનિ પદ્મહસ્તે પદ્માલયે પદ્મદળાયતાક્ષિ ।
વિશ્વપ્રિયે વિષ્ણુ મનોટનુકૂલે ત્વત્પાદપદ્મં મયિ સન્નિધત્સ્વ ॥

યા સા પદ્માસનસ્થા વિપુલકટિતટી પદ્મપત્રાયતાક્ષી ।
ગંભીરા વર્તનાભિઃ સ્તનભર નમિતા શુભ્ર વસ્ત્રોત્તરીયા ॥

લક્ષ્મીર્દિવ્યૈ–ર્ગજેંદ્રૈમણિગણ ખચિતૈ–સ્સ્નાપિતા હેમકુંભૈઃ ।
નિત્યં સા પદ્મહસ્તા મમ વસતુ ગૃહે સર્વમાંગળ્યયુકતા ॥
લક્ષ્મીં ક્ષીરસમુદ્ર રાજતનયાં શ્રી રંગધામેશ્વરીમ ।
દાસી ભૂત સમસ્ત દેવ વનિતાં લોકૈક દીપાંકુરામ ।
શ્રી મન્મંદકટાક્ષલબ્ધ વિભવ બ્રહ્મેંદ્રગંગાધરામ ।
ત્વાં ત્રૈલોક્ય કુટુંબિનીં સરસિજાં વંદે મુકુંદપ્રિયામ ॥

સિદ્ધલક્ષ્મી–મોૅક્ષલક્ષ્મી–જૅયલક્ષ્મીસ્સરસ્વતી ।
શ્રી લક્ષ્મીર્વરલક્ષ્મીશ્ચ પ્રસન્ના મમ સર્વદા ।
વરાંકુશૌ  પાશમભીતિમુદ્રાં કરૈર્વહંતીં કમલાસનસ્થામ ।
બાલાર્ક કોટિ પ્રતિભાં ત્રિણેત્રાં ભજેહમાદ્યાં જગદીશ્વરીં ત્વામ ॥

સર્વમંગળ માંગળ્યે શિવે સર્વાર્થ સાધિકે।
શરણ્યે ત્ર્યંબકે દેવિ નારાયણિ નમોઽસ્તુ તે ॥
નારાયણિ નમોઽસ્તુ તે ॥
નારાયણિ નમોઽસ્તુ તે ॥

સરસિજ નિલયે સરોજ હસ્તે ધવળતરાંશુક ગંધમાલ્યશોભે ।
ભગવતિ હરિવલ્લભે મનોજ્ઞે ત્રિભુવન ભૂતિકરિ પ્રસીદ મહ્યમ ॥

વિષ્ણુપત્નીં ક્ષમા દેવીં માધવીં માધવપ્રિયામ ।
વિષ્ણોઃ પ્રિયસખીં દેવીં નમામ્યચ્યુત વલ્લભામ ॥

મહાલક્ષ્મી ચ વિદ્મહે વિષ્ણુપત્ની ચ ધીમહિ ।
તન્નો લક્ષ્મીઃ પ્રચોદયાત ॥

શ્રી વર્ચસ્યં આયુષ્યં આરોગ્યમાવિધાત પવમાનં મહીયતે ।
ધનં ધાન્યં પશું બહુપુત્રલાભં શતસંવત્સરં દીર્ઘમાયુઃ ॥
ઋણરોગાદિ દારિદ્ર્ય પાપક્ષુદપમૃત્યવઃ ।
ભયશોક મનસ્તાપા નશ્યંતુ મમ સર્વદા ॥

શ્રિયે જાત શ્રિય આનિર્યાય શ્રિયં વયો જનિતૃભ્યો દધાતુ ।
શ્રિયં વસાના અમૃતત્વમાયન ભજંતિ સદ્યઃ સવિતા વિદધ્યૂન ॥
શ્રિય એવૈનં તચ્છ્રિયામાદધાતિ ।

સંતતમૃચા વષટ્કૃત્યં સંધત્તં સંધીયતે પ્રજયા પશુભિઃ ।
ય એવં વેદ ।
ૐ મહાદેવ્યૈ ચ વિદ્મહે વિષ્ણુપત્ની ચ ધીમહિ ।
તન્નો લક્ષ્મીઃ પ્રચોદયાત ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥